
# अष्टमः पाठः

## सर्वनामप्रयोगः - ସର୍ବନାମ ବ୍ୟବହାର

### तद् (ସେ / ତାହା) - पुंलिङ्गे



वीरःअस्ति



सः घोटकः अस्ति

वीरः तं घोटकं पश्यति। सः तेन घोटकेन भ्रमति। तस्मै घोटकाय चणकं ददाति। दुर्बलः तस्मात् घोटकात् विभेति। तस्य घोटकस्य वर्णः कृष्णः । तस्मिन् घोटके वीरः प्रीतः अस्ति।

### एतद् (ଏ / ଏହା) - पुंलिङ्गे






एषः गायकः अस्ति। सः गोपालः अस्ति। गोपालः एतं गायकं नमति। एतेन गायकेन सह भ्रमति। एतस्मै गायकाय भोजनं ददाति। एतस्मात् गायकात् गीतं शृणोति। एतस्य गायकस्य स्वरः मधुरः। एतस्मित् गायके गोपालः भक्तिं करोति।


**ଶବ୍ଦାର୍ଥ** - ତଦ୍ - ସେ, ବିଭେତି - ଭୟ କରୁଛି, କୃଷ୍ଣଃ - କଳା, ପ୍ରୀତଃ - ଖୁସି, ଅସ୍ତି - ଅଛି, ନମତି - ନମସ୍କାର କରୁଛି, ସହ - ସହିତ, ଦଦାତି - ଦେଉଛି, ଶୃଣୋତି - ଶୁଣୁଛି ।

## तद् (ସେ / ତାହା)- स्त्रीलिङ्गे






(सा) बालिका



(सा) माला

बालिका तां मालां स्पृशति। तया मालया सह क्रीडति। तस्यै मालायै स्पृहयति। कदापि तस्याः मालायाः पुष्पं न चिनोति। तस्याः मालायाः नाम अपराजिता। तस्यां मालायां बालिका अनुरक्ता अस्ति।


## एतद् (ଏ / ଏହା)- स्त्रीलिङ्गे



एषा शाटिका। रमा एतां शाटिकां क्रीणाति। मम एतया शाटिकया प्रयोजनम् अस्ति। एतस्यै शाटिकायै धनम् आवश्यकम्। एतस्याः शाटिकायाः सुन्दरशाटिका नास्ति। एतस्याः शाटिकायाः रङ्गः मनोहरः। एतस्यां शाटिकायां मम रुचिः अस्ति।


**ଶବ୍ଦାର୍ଥ** - ସ୍ପୃଶତି - ଛୁଏଁ, ସ୍ପୃହୟତି - ଭଲପାଏ, ଚିନୋତି - ତୋଳେ (ଛିଣ୍ଡାଏ), କ୍ରୀଣାତି - କିଣେ।

## एतद् (ଏ / ଏହା) - नपुंसकलिङ्गे



एतत् फलम्। रामः एतत् फलं खादति। सः एतेन फलेन तृप्तः अस्ति। एतस्मै फलाय जनकः धनं ददाति। जननी एतस्मात् फलात् बीजम् आहरति। एतस्य फलस्य मूल्यं स्वल्पम्। एतस्मिन् फले जीवसारः अस्ति।

## तद् (ସେ / ତାହା)- नपुंसकलिङ्गे





तत् कुसुमम्। बालकः तत् कुसुमम् आनयति। तेन कुसुमेन देवं पूजयति। तस्मै कुसुमाय भ्रमरः आगच्छति। तस्मात् कुसुमात् मधु पिबति। तस्य कुसुमस्य वर्णः लोहितः। तस्मिन् कुसुमे सुगन्धः अस्ति

**ଶବ୍ଦାର୍ଥ** - ଖାଦତି - ଖାଏ, ତୃପ୍ତଃ - ସନ୍ତୁଷ୍ଟ, ବୀଜମ୍ - ମଞ୍ଜି, ଆହରତି - ସଂଗ୍ରହ କରେ, ସ୍ୱଳ୍ପମ୍ - ଅଳ୍ପ, କୁସୁମ- ଫୁଲ, ପିବତି - ପିଏ, ଲୋହିତଃ - ଲାଲ।

## एतानि वाक्यानि पठतु (ଏହି ବାକ୍ୟଗୁଡ଼ିକୁ ପଢ଼)

१. शिक्षक: तं पृच्छति ।

२. पिता ताम् आह्वयति ।

३. माधव: एतां पश्यति ।

४. एषा तौ जानाति ।

५. बालक: एता: कथा: पठति ।

६. भ्राता कं वदति ?

७. वानर: कानि फलानि खादति ?

८. नरा: का: नगरी: पश्यन्ति ?

९. अहं तौ वदामि ।

१०. ते तानि फलानि खादन्ति ।

**ଶବ୍ଦାର୍ଥ –** ପୃଚ୍ଛତି – ପଚାରୁଛନ୍ତି । ଆହ୍ୱୟତି – ଡାକୁଛନ୍ତି । ପଶ୍ୟତି – ଦେଖୁଛି । ତୌ – ସେ ଦୁହିଁଙ୍କୁ, ଜାନାତି – ଜାଣେ । ଏତାଃକଥାଃ – ଏହି କଥାଗୁଡ଼ିକୁ । କଂ – କାହାକୁ । ବଦତି – ବହୁଛି । ପଠତି – ପଢୁଛି । କାନି ଫଳାନି – କେଉଁ ଫଳଗୁଡ଼ିକୁ । କାଃ ନଗରୀଃ – କେଉଁ ନଗରୀଗୁଡ଼ିକୁ । ପଶ୍ୟନ୍ତି – ଦେଖୁଛନ୍ତି । ବଦାମି – ମୁଁ କହୁଛି । ତାନି ଫଳାନି – ସେହି ଫଳ ଗୁଡ଼ିକ । ଖାଦନ୍ତି – ଖାଉଛନ୍ତି ।

## अभ्यासः (ଅଭ୍ୟାସ)



१. शून्यस्थानं पूरयतु - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(एतस्मिन्, तस्य, तस्मै, तां, एतस्यै)

क) ......... घोटकाय ।

ख) ......... मालाम् ।

ग) ......... गायकस्य ।

घ) ......... शाटिकायै ।

ङ) ......... फले जीवसारः ।

२. स्तम्भं योजयतु (ସ୍ତମ୍ଭ ମିଳନ କର)

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| तस्याः | फलात् |
| एतस्मात् | मालायाः |
| तेन | गायकम् |
| एतं | घोटकस्य |
| तस्य | कुसुमेन |

३. संस्कृतेन उत्तरं लिखतु - (ସଂସ୍କୃତରେ ଉତ୍ତର ଲେଖ)

क) भ्रमरः कस्मात् मधु पिबति ?

ख) कस्मिन् गोपालः भक्तिं करोति ?

ग) बालकः केन देवं पूजयति ?

घ) वीरः कस्मिन् प्रीतः अस्ति ?

ङ) रामः किं खादति ?

(एतस्मिन् गायके, तस्मात् कुसुमात्, तस्मिन् घोटके, एतत् फलं, तेन कुसुमेन)

**ତୁମପାଇଁ କାମ** - ପଠିତ ବିଷୟରୁ ତଦ୍ ଓ ଏତଦ୍ ଶବ୍ଦର ପ୍ରୟୋଗ ହୋଇଥିବା ରୂପ ଗୁଡ଼ିକୁ ସଂଗ୍ରହ କରି ନିଜ ଖାତାରେ ଲେଖ ।

***